नं. ५१०५

वाजसनेयी संहिता

सस्वरः संहिता पाठः

x x x x

पत्र. ३५६ —— सं. १८०६

संहिता ब्राह्मणं

© Dharmartha Trust J&K. Digitized by eGangotri

वाजसनेयी संहिता

संहितापाठः अध्याया (१-४०)

५१०४

प० १

© Dharmartha Trust J&K. Digitized by eGangotri

१८ ५१०४

॥श्रीमद्याज्ञिकदेवकृतलनीपोथीसंहिताऽध्याय ५० पत्र ३५ ॥ पहनार्थैककरणाकृतस्य॥

॥तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् । परहस्ते न दातव्यं एवं वदति पुस्तिका:

२३००

© Dharmartha Trust J&K. Digitized by eGangotri

॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ यजुर्वेदाय नमः ॥ हरिः ॥ ओं ॥ इषे त्वा ॥ इषे त्वो-
र्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्या-
यध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ई-
शत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि
॥ १ ॥ वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घ-
र्मोऽसि विश्वधा असि । परमेण धाम्ना दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षी-
त् ॥ २ ॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सह-

© Dharmartha Trust J&K. Digitized by eGangotri

स्वधा स्थ॥२॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा॥ कामधु
क्षः॥३॥ सा विश्वायुः॥ सा विश्वकर्म्मा॥ सा विश्वधायाः॥ इन्द्रस्य त्वा भा
गं सोमेनातनच्मि॥ विष्णो हव्यं रक्ष॥४॥ अग्ने व्रतपते व्रतं चरिष्यामि
तच्छकेयन्तन्मे राध्यताम्॥ इदमहमनृतात्सत्यमुपैमि॥५॥ कस्त्वा॥ युन
क्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति॥ कर्म्मणे वां वेषाय
वाम्॥६॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरात
यः॥ उर्वन्तरिक्षमन्वेमि॥७॥ धूरसि॥ धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धू

© Dharmartha Trust J&K. Digitized by eGangotri

॥२॥

2

र्व्वन्तं धूर्व्व यं ब्बयं धूर्व्वामः ॥ देवानामसि ब्बह्नितमं सस्नितमं पप्रितमं
ञ्जुष्टतमं देवहूतमम् ॥ ८ ॥ अह्रुतमसि हविर्द्धानं दृंहस्व मा ह्वार्म्मा ते
यज्ञपतिर्ह्वार्षीत् ॥ विष्णुस्त्वा क्रमतामुरु ब्बातायापहतꣳ रक्षो यच्छन्ता
म्पञ्च ॥ ९ ॥ देवस्य त्वा ॥ सवितुः प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ शिव
म् ॥ अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्याञ्जुष्टं गृह्णामि ॥ १० ॥ भूता ॥२॥
य त्वा ॥ नारातये स्वरभिविख्येषं दृंहन्तान्दुर्याः पृथिव्यामुर्व्वन्तरि
क्षमन्वेमि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेग्ने हव्यं

© Dharmartha Trust J&K. Digitized by eGangotri

रक्षा ॥११॥ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यछिद्रे
ण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ देवीरापो ऽअग्रेगुवो ऽअग्रेपुवो
ऽग्रइममद्य यज्ञन्नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिन्देवयुवम्
॥१२॥ युष्मा ऽइन्द्रो ऽवृणीत वृत्रतूर्य्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य्ये २४
प्रोक्षितास्थ ॥ अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यान्त्वा जु
ष्टं प्रोक्षामि ॥ दैव्याय कर्म्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः
पराजघ्नुरिदं वस्तच्छुन्धामि ॥१३॥ शर्म्मास्यवधूतꣳ रक्षोव

© Dharmartha Trust J&K. Digitized by eGangotri

धूताऽअरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥ अद्रिरसि वान
स्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥१४॥ अग्ने
स्तनूः ॥ असि वाचो विसर्ज्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावा
सि वानस्पत्यः सऽइदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व ॥ शिव
हविष्कृदेहि हविष्कृदेहि ॥१५॥ कुक्कुटोऽसि मधुजिह्वऽइषमूर्ज्ज
मावद त्वया वयꣳ सङ्घातꣳ सङ्घातञ्जेष्म वर्षवृद्धमसि प्रति त्वा
वर्षवृद्धं वेत्तु परापूतꣳ रक्षः परापूताऽअरातयोऽपहतꣳ रक्षो वा

© Dharmartha Trust J&K. Digitized by eGangotri

भ्रातृव्यस्य

युर्वो बिविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वछिद्रे
णपाणिना ॥ २४ ॥ धृष्टिरसि ॥ अपाग्नेग्निमामादं जहि निष्क्र
व्यादं सेधा देवयजं वह ॥ ध्रुवमसि पृथिवीं दृंह ब्रह्मवनि त्वा
क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ २५ ॥ अग्ने
ब्रह्म ॥ गृभ्णीष्व ॥ धरुणमस्यन्तरिक्षं दृंह ब्रह्मवनि त्वा क्षत्रव
नि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ धर्त्रमसि दि
वं दृंह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

साङ्ग० ६

॥४॥

वधाय॥ विश्वाभ्यस्त्वाशाभ्य उपदधामि चितस्थोर्द्ध्वचितो भृगूणा

५ मङ्गिरसान्तपसा तप्यद्ध्वम्॥१८॥ शर्म्मासि॥ अवधूतꣳरक्षो वधूता

अरातयो दित्यास्त्वगसि प्रति त्वादितिर्वेत्तु॥ धिषणासि पर्वती

प्रति त्वादित्यास्त्वग्वेत्तु दिवस्कम्भनी [illegible]सि पार्वतेयी प्रति त्वा प शिव०

र्वती वेत्तु धान्यमसि॥१९॥ धान्यमसि धिनुहि देवान्प्राणाय त्वो ॥४॥

दानाय त्वा व्यानाय त्वा॥ दीर्घामनु प्रसितिमायुषे धान्देवो वः

सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वाम्

[illegible]षणासि ५

© Dharmartha Trust J&K. Digitized by eGangotri

हीनाम्पयोसि॥२०॥देवस्यत्वा॥सवितुःप्रसवेश्विनोर्बाहुभ्याम्पू
ष्णोहस्ताभ्याम्॥संवपामिसमापऽओषधीभिःसमोषधयोरसेन॥
सꣳरेवतीर्जगतीभिःपृच्यन्ताꣳसम्मधुमतीर्मधुमतीभिःपृच्य
न्ताम्॥२१॥जनयत्यैत्वा॥संयौमीदमग्नेरिदमग्नीषोमयोरिषेत्वा॥
घर्मोसिविश्वायुरुरुप्रथाऽउरुप्रथस्वोरुतेयज्ञपतिःप्रथता
मग्निष्टेत्वचम्माहिꣳसीद्देवस्त्वासविताश्रपयतुवर्षिष्ठेधिनाके
॥२२॥माभेः॥म्मासंविक्थाऽअतमेरुर्यज्ञोतमेरुर्यजमानस्य

© Dharmartha Trust J&K. Digitized by eGangotri

प्रजाभूयात्त्रिताय त्वा द्विताय त्वैकताय त्वा ॥२३॥ देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददेऽध्वरकृतं देवेभ्य इ
न्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा
द्विषतो वधः ॥२४॥ पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषं शिव.
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां ॥५॥
शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥
२५॥ अपाररुं पृथिव्यै देवयजनाद्वध्यासं व्रजं गच्छ गोष्ठानं वर्षतु

© Dharmartha Trust J&K. Digitized by eGangotri

ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्यो स्मान्द्वे
ष्टि यं च वयं द्विष्मस्तमतो मा मौक्॥ अररो दिवं मा पप्तो द्रप्सस्ते द्यां
मा स्कन् व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां
४ पृथिव्यां शतेन पाशैर्यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौ
क्॥ रद्दि॥ गायत्रेण त्वा॥ छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा
परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि॥ सुक्ष्मा चासि शि
वा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च॥

© Dharmartha Trust J&K. Digitized by eGangotri

शि॰ हे॰

॥६॥

6

२७॥ पुराक्रूरस्य॥ विसृपो विरप्शिन्नुदादाय पृथिवीञ्जीवदानुम्॥
यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते॥ प्रो
क्षणीरासादय द्विषतो वधोऽसि॥२८॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरा
तयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः॥ अनिशितोऽसि सपत्न
क्षिद्वाजिनन्त्वा वाजेध्यायै सम्मार्ज्मि॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा
अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः॥ अनिशितासि सप
त्नक्षिद्वाजिनीन्त्वा वाजेध्यायै सम्मार्ज्मि॥२९॥ अदित्यै रा

शिव॰ ॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्नां॥ सि विष्णो र्वेष्पो स्यूर्जे त्वादब्धेन त्वा चक्षुषावपश्यामि
॥ अग्नेर्जिह्वासि सुभूर्देवेभ्यो धाम्नेधाम्ने मेभव यजुषेयजुषे॥
॥ ऋ॥ सवितुस्त्वा॥ प्रसवउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य
रश्मिभिः॥ सवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य
स्य रश्मिभिः॥ तेजोसि शुक्रमस्यमृतमसि धामनामासि
प्रियं देवानामनाधृष्टं देवयजनमसि॥ ३१॥ इति वाजसनेयसं यी२
हितायां प्रथमोध्यायः॥ १॥ कृष्णोसि॥ कृष्णोस्याखरेष्ठोग्नये

© Dharmartha Trust J&K. Digitized by eGangotri

संहि॰ हे॰
॥७॥

स्त्वा जुष्टम्प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टाम्प्रोक्षामि बर्हिरसि स्रुग्भ्य
स्त्वा जुष्टम्प्रोक्षाम्यदित्यै व्युन्दनम् ॥१॥ अदित्यै व्युन्दनमसि विष्णो
स्तुपोस्यूर्णम्म्रदसन्त्वा स्तृणामि स्वासस्थान्देवेभ्यो भुवपतये स्वा
हा भुवनपतये स्वाहा भूतानाम्पतये स्वाहा ॥२॥ गन्धर्वस्त्वा विश्वा
वसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड
ऽईडितः ॥ इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य प
रिधिरस्यग्निरिडऽईडितः ॥ मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवे

हा

शिवजी
॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

णधर्म्मणा॥विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडईडितः॥३॥
वीतिहोत्रन्त्वा॥कवे द्युमन्तꣳ समिधीमहि॥अग्ने बृहन्तमध्वरे॥४॥
समिदसि॥सूर्य्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्यै॥सवितुर्बा
हू स्थऽऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यऽआ त्वा वसवो
रुद्राऽआदित्याः सदन्तु॥५॥घृताच्यसि॥जुहूर्नाम्ना सेदं प्रियेण
धाम्ना प्रियꣳ सदऽआसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण
धाम्ना प्रियꣳ सदऽआसीद घृताच्यसि ध्रुवा नाम्ना सेदं प्रियेण

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ हि॰ हे॰
॥८॥
९

[redacted]तसरिष्ट्यान्नवाना ×३

धाम्न्यां प्रियं सद आसीदप्रियेण धाम्ना प्रियं सद आसीद्ध्रुवा ऽ
असदनृतस्य योनौ ना विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मांय
ज्ञन्यम् ॥ ९ ॥ अग्ने वाजजिन्नाद्वाजन्त्वा जजितं संमार्मि ॥ नमो दे
भ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तमस्कन्नाण ॥ अस्कन्नमद्य देवेभ्य स्यः
आज्यं संभ्रियासमङ्घ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने ते शिव
छायामुपस्थेषं विष्णोः स्थानमसीत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आ ॥८॥
स्थात् ॥ ८ ॥ अग्ने वे॰ होत्रं वेर्दूत्यमवतान्त्वान्द्यावापृथिवी स्विष्ट

१× अवच द्यावापृथिवी ×७

© Dharmartha Trust J&K. Digitized by eGangotri

कृद्देवेभ्य इन्द्र आज्येन हविषा भूत्स्वाहा । सं ज्योतिषा ज्योतिः ॥
९ ॥ मयीदमिन्द्र इन्द्रियं दधात्वस्मान्रायो मघवानः सचन्ताम् ।
अस्माकं सन्त्वाशिषः सत्या नः सन्त्वाशिषः । उपहूता पृथिवी मा-
तोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहा ॥ १० ॥ उपहूतो द्यौः
पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा । देवस्य त्वा
सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । प्रतिगृह्णा-
म्यग्नेष्ट्वास्येन प्राश्नामि ॥ ११ ॥ एतं ते देव सवितर्यज्ञं प्राहुः

© Dharmartha Trust J&K. Digitized by eGangotri

सा॰ह॰ २॰
॥श्री॥
१

बृहस्पतयेब्रह्मणे॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव॥१२॥म
नोजूतिः॥ जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंय्य
ज्ञꣳसमिमन्दधातु॥ विश्वेदेवासऽइहमादयन्तामोꣳम्प्रतिष्ठ॥१३॥
एषाते॥ऽअग्नेसमित्तयावर्द्धस्वचाचप्यायस्व॥ वर्द्धिषीमहिचवय
माचप्प्यासिषीमहि॥ अग्नेवाजजिद्वाजन्त्वासस्वाꣳसंवाज
जितꣳसम्मार्ज्मि॥१४॥ अग्नीषोमयोरुज्जितिमनूज्जेषंवाजस्य
माप्रसवेनप्रोहामि॥ अग्नीषोमौतमपनुदतांयोस्मान्द्वेष्टियञ्च

शिव॰
॥श्री॥

© Dharmartha Trust J&K. Digitized by eGangotri

वयन्द्विष्मो वाजस्यैनम्प्रसवेनापोहामि॥ इन्द्राग्न्योरुज्जितिमनूज्जे
षं वाजस्य मा प्रसवेन प्रोहामि॥ इन्द्राग्नी तमपनुदतां योऽस्मान्द्वे
ष्टि यञ्च वयन्द्विष्मो वाजस्यैनम्प्रसवेनापोहामि॥१५॥ वसुभ्यस्त्वा
रुद्रेभ्यस्त्वादित्येभ्यस्त्वा सञ्जानाथान्द्यावापृथिवी मित्रावरुणौ
त्वा वृष्ट्यावताम्॥ व्यन्तु वयोक्तं रिहाणा मरुताम्पृषतीर्गच्छ व
शा पृश्निर्भूत्वा दिवङ्गच्छ ततो नो वृष्टिमावह॥ चक्षुष्पा ऽ अग्नेसि
चक्षुर्मे पाहि॥१६॥ यम्परिधिम्॥ पर्यधत्था ऽ अग्ने देव पणिभि

© Dharmartha Trust J&K. Digitized by eGangotri

संहि० हे०
॥१७॥
10

र्गुह्यमानः॥ तन्त ऽएतमनुजोषम्भराम्येष नेत्त्वदपचेतयाता ऽअग्नेः
प्रियम्पाथोऽपीतम्॥१७॥ स ँ स्रवभागास्थेषा बृहन्तः प्रस्तरेष्ठाः
परिधेयाश्च देवाः॥ इमां वाचमभिविश्वेगृणन्त ऽआसद्यास्मि
न्बर्हिषिमादयध्व ँ स्वाहावाट्॥१८॥ घृताचीस्थो धुर्य्यौ पातं
सुम्ने स्थः सुम्नेमाधत्तम्॥ यज्ञ नमश्च त ऽउपच यज्ञस्य शिवे शिव०
सन्तिष्ठस्वस्विष्टेमे सन्तिष्ठस्व॥१९॥ अग्नेदब्धायो॥ शीतमपा ॥१०॥
हिमादिद्योःपाहिप्रसित्यैपाहिदुरिष्ट्यैपाहिदुरद्मन्या ऽअविष

न्नः पितुङ्कृणु सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सर
स्वत्यै यशोभगिन्यै स्वाहा ॥ २० ॥ वेदोसि ॥ येन त्वन्देव वेद देवेभ्यो
वेदोभवस्तेन मह्यं वेदो भूयाः ॥ देवा गातुविदो गातुं वित्वा गा
तुमित ॥ मनसस्पत इमन्देव यज्ञं स्वाहा वाते धाः ॥ २१ ॥ सम्बर्हि
ः ॥ रङ्क्तां हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ॥ समि
न्द्रो विश्वेभिर्देवेभिरङ्क्तान्दिव्यन्नभो गच्छतु यत्स्वाहा ॥ २२ ॥ कस्त्वा ॥
विमुञ्चति सत्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमु

© Dharmartha Trust J&K. Digitized by eGangotri

संहि० हे
।।११।।

च्चति।।पाषो।यरस्सं सा स्नाग्गेंसि।।२३।।संवर्च्चसा।।पयसा सन्तनूभि
र्गन्महि मनसा सः शिवेन।।त्वष्टा सुदत्रो विदधातु रायो नु मार्ष्टु
तन्वो यद्विलिष्टम्।।२४।।दिवि विष्णुः।व्यक्रꣳस्त जागतेन छ
न्दसा ततो निर्भक्तो यो स्मान्द्वेष्टि यञ्च वयं द्विष्मो न्तरिक्षे विष्णु शिव
र्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो यो स्मान्द्वेष्टि यञ्च ।।११।।
वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो नि
र्भक्तो यो स्मान्द्वेष्टि यञ्च वयं द्विष्मो स्मादन्नादस्यै प्रतिष्ठायाऽ

© Dharmartha Trust J&K. Digitized by eGangotri

अगन्म स्वः सज्योतिषा भूम॥२५॥ स्वयम्भूरसि॥ श्रेष्ठो रश्मिर्व्व
र्चोदा ऽअसि वर्च्चो मे देहि॥ सूर्य्यस्यावृतमन्वावर्त्ते॥२५॥ अग्ने गृ
हपते॥ सुगृहपतिस्त्वयाग्ने ऽहं गृहपतिना भूयासं॥ सुगृहपतिस्त्वं
मयाग्ने गृहपतिना भूया॥ अस्थूरि णौ गार्हपत्यानि सन्तु शत
ꣳ हिमाः सूर्य्यस्यावृतमन्वावर्त्ते॥२७॥ अग्ने व्रतपते॥ व्रतमचा
रिषन्तदशकन्तन्मेराधि॥ इदमहं य एवास्मि सो ऽस्मि॥२८॥ अग्न
ये कव्यवाहनाय॥ स्वाहा॥ सोमाय पितृमते स्वाहा॥ अपहता ऽ

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰हि॰ह॰

॥१२॥ असुरारक्षांसिवेदिषदः॥२९॥येरूपाणि॥प्रतिमुञ्चमानाऽअसु

राःसन्तःस्वधयाचरन्ति॥परापुरोनिपुरोयेभरन्त्यग्निष्टांल्लोका तिऽ

त्प्रणुदात्यस्मात॥३०॥अत्रपितरोमादयध्वंयथाभागमावृषा

यध्वम्॥अमीमदन्तपितरोयथाभागमावृषायिषत॥३१॥नमो

वःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजीवाय शिव॰

नमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्य ॥१२॥

वेनमोवःपितरःपितरोनमोवोगृहान्नःपितरोदत्तसतोवःपि

© Dharmartha Trust J&K. Digitized by eGangotri

नरो देष्मैतन्वः पितरो वासऽआधत्त ॥३२॥ आधत्त पितरो गर्भङ्कु
मारम्पुष्करस्रजम् । यथेह पुरुषोसत् ॥३३॥ ऊर्जं वहन्तीरमृतङ्घृतं प
यः कीलालम्परिस्रुतम् । स्वधास्थ तर्प्पयत मे पितॄन् ॥३४॥
इति वाजसनेयी संहितायां द्वितीयोध्यायः ॥२॥ समिधाग्निम् ।
समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥
॥१॥ सुसमिद्धाय शोचिषे घृतन्तीव्रं जुहोतन । अग्नये जातवेदसे ॥२॥
तन्त्वा ॥ समिद्भिरङ्गिरो घृतेन वर्द्धयामसि । बृहच्छोचा यविष्ठ्य ॥३॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं.ह. ३

॥१३॥

उपत्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्य्यत । जुषस्व समिधो मम ॥४॥ भूर्भुवः

स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा । तस्यास्ते पृथिवि देवयजनि

पृष्ठेग्निमन्नादमन्नाद्यायादधे ॥५॥ आयं गौः पृश्नि

रक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥६॥ अन्तश्चरति रो

चनास्य प्राणादपानती ॥ व्यख्यन्महिषो दिवम् ॥७॥ त्रिंशद्धाम

विराजति वाक्पतङ्गाय धीयते ॥ प्रति वस्तोरह द्युभिः ॥८॥ अग्निर्ज्यो

तिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ अग्नि

शिवजी ॥१३॥

© Dharmartha Trust J&K. Digitized by eGangotri

वर्च्चो ज्योति र्वर्च्चः स्वाहा सूर्य्यो वर्च्चो ज्योति र्वर्च्चः स्वाहा ॥ ज्योतिः सूर्य्यः
सूर्य्यो ज्योतिः स्वाहा ॥ ९ ॥ सजूर्द्देवेन ॥ सवित्रा सजूरात्र्येन्द्रवत्या ॥ जु
षाणो ऽ अग्नि र्वेतु स्वाहा ॥ सजूर्द्देवेन सवित्रा सजूरुषसेन्द्रवत्या ॥ जु
षाणः सूर्य्यो वेतु स्वाहा ॥ १० ॥ उपप्रयन्तो ऽ अध्वरम्मन्त्रं वोचेमाग्नये ॥
आरे ऽ अस्मे च शृण्वते ॥ ११ ॥ अग्नि र्मूर्द्धा ॥ दिवः ककुत्पतिः पृथिव्या ऽ
अयम् ॥ अपाᳬ रेताᳬसि जिन्वति ॥ १२ ॥ उभा वामिन्द्राग्नी ऽ आहुवध्या ऽ
उभा राधसः सह मादयध्यै ॥ उभा दातारा विषाᳬ रयीणा मुभा वाज

© Dharmartha Trust J&K. Digitized by eGangotri

स्यसातये हुवेवामृ॥१३॥ अयन्ते॥ यो निर्ऋत्वि यो यतो जातोऽअरोचथाः॥
तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम्॥१४॥ अयमिह। प्रथमो धा
यि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्व
नेषु चित्रं विभ्वं विशे विशे॥१५॥ अस्य प्र[illegible]त्नामनु द्युतꣳ शुक्रं दुदुह्रे
अह्रयः॥ पयः सहस्रसामृषिम्॥१६॥ तनूपाऽअग्नेसि तन्वं मे पाह्या
युर्दाऽअग्नेस्यायुर्मे देहि वर्चोदाऽअग्नेसि वर्चो मे देहि। अग्ने यन्मे तन्वा
ऽऊनन्तन्मऽआपृण॥१७॥ इन्धानास्त्वा॥ शतꣳ हिमा द्युमन्तꣳ समिधी

© Dharmartha Trust J&K. Digitized by eGangotri

मह्नि॥ वयस्वन्तो वयस्कृतᳪ सहस्वन्तः सहस्कृतम्॥ अग्ने सपत्नदम्भनम
दब्धासोऽअदाभ्यम्॥ चित्रावसो स्वस्ति ते पारमशीय॥ १८॥ सन्त्वम्॥ सन्त्व
मग्ने सूर्यस्य वर्चसागथाः समृषीणाᳪ स्तुतेन॥ सम्प्रियेण धाम्ना स
महमायुषा सं वर्चसा सम्प्रजया सᳪ रायस्पोषेण ग्मिषीय॥ १९॥ अ
न्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोर्जस्थोर्जं वो भक्षीय रा
यस्पोषस्थ रायस्पोषं वो भक्षीय॥ २०॥ रेवती रमध्वमस्मिन्योनावस्मि
न्गोष्ठेऽस्मिंल्लोकेऽस्मिन्क्षये॥ इहैव स्त मापगात॥ २१॥ सᳪहितासि॥ विश्व

© Dharmartha Trust J&K. Digitized by eGangotri

संहि॰ ३

॥२५॥

पी।कु

रूप्यूर्ज्जा मा विश गोपत्येन॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्द्धिया वयम्॥ नमो

भरन्तऽएमसि॥२२॥ राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम्॥ वर्द्धमानꣳ

वाऽ स्वे दमे॥२३॥ स नः॥ पितेव सूनवेऽग्ने सूपायनो भव॥ सचस्वा नः स्वस्तये॥

२४॥ अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्र

वाःऽ वाऽअच्छा नक्षि द्युमत्तमꣳ रयिन्दाः॥२५॥ तन्त्वा॥ शोचिष्ठ दीदिवः सुम्नाय शिव॰ ॥१५॥

नूनमीमहे सखिभ्यः॥ स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः सम

हि।ऽ स्मात्॥२६॥ इडऽएह्यदितऽएहि काम्याऽएत॥ मयि वः कामधरणम्भूया

हि।

© Dharmartha Trust J&K. Digitized by eGangotri

व॥२७॥ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते ॥ कक्षीवन्तं य औशिजः
॥२८॥ यो रेवान्यो ऽअमीवहा वसुवित्पुष्टिवर्द्धनः ॥ स नः सिषक्तु यस्तुरः
॥२९॥ मा नः ॥१८॥ शंसो ऽअररुषो धूर्त्तिः प्रणङ्मर्त्यस्य ॥ रक्षा णो ब्रह्मणस्पते
॥३०॥ महि त्रीणामवोस्तु द्युक्षं मित्रस्यार्य्यम्णः ॥ दुराधर्षं वरुणस्य ॥ ॥
३१॥ नहि तेषाममा चन नाध्वसु वारणेषु ॥ ईशे रिपुरघशंसः ॥३२ स। रि५
ते हि पुत्रासो ऽअदितेः प्रजीवसे मर्त्याय ॥ ज्योतिर्यच्छन्त्यजस्रम् ॥३३॥
कदाचन ॥ स्तरीरसि नेन्द्र सश्चसि दाशुषे ॥ उपोपेन्नु मघवन्भूय इन्नु ते
नि

© Dharmartha Trust J&K. Digitized by eGangotri

संध्या हे
॥१६॥
16

दानन्देवस्य धीमहि॥३४॥ तत्सवितुः॥ वरेण्यम्भर्गो देवस्य धीमहि॥ धियो
यो नः प्रचोदयात्॥३५॥ गानम्॥ के० १००॥ परितः॥ ददुः भोरथो स्मौ राः ऽ अश्ना
तुविश्रवतेः॥ येन रक्षसि दाश्रुषः॥३६॥ भूर्भुवः॥ स्वः॥ सुप्रजाः प्रजाभिः
स्याम् सुवीरो वीरैः सुपोषः पोषैः॥ नर्यप्रजाम्मे पाहि॥ शंस्य पशू
म्मे पाह्यथर्य पितुम्मे पाहि॥३७॥ आगन्म॥ विश्ववेदसमस्मभ्यं
वसुवित्तमम्॥ अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्व॥३८॥ अ
यमग्निः॥ गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः॥ अग्ने गृहपते भि

पाहि॥ ५
॥१६॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्युम्नमभिसहऽआयच्छस्व॥३९॥ अयमग्निः॥ पुरीष्यो रयिमान्पुष्टिवर्द्धनः॥
अग्ने पुरीष्याभिद्युम्नमभिसहऽआयच्छस्व॥४०॥ गृहा मा॥ बिभीत मा वेपध्व
मूर्जम्बिभ्रतऽएमसि॥ ऊर्जम्बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मो
दमानः॥४१॥ [illegible]॥ येषामध्येति॥ प्रवसन्येषु सौमनसो बहुः॥ गृहानुप
ह्वयामहे ते नो जानन्तु जानतः॥४२॥ उपहूताऽइह॥ गावऽउपहूताऽअजा
वयः॥ अथोऽअन्नस्य कीलालऽउपहूतो गृहेषु नः॥ क्षेमाय वः शान्त्यै प्र
पद्ये शिवं शग्मं शंयोः शंयोः॥४३॥ प्रघासिनो हवामहे॥ मरुतश्च

© Dharmartha Trust J&K. Digitized by eGangotri

हि·ई
॥१७॥
२ मिद

रिशादसः॥ कस्मैण्णसजोषसः॥४४॥ अद्धामेयदरस्येयस्मायांयदिनु
पा॥ यादनेश्स्वक्रमावयन्नदवयजामाऽस्वाऊ॥४५॥ मोषूणः॥ऽइ
नुात्रपरस्तुादवैरस्त्रिइषमातस्तुष्मिन्नवयाः॥मरीस्त्वुद्यस्यमीतुत्रोयघ्याइ
विषमतोमरुतोबहतेगीः॥४६॥ अकेन्कर्म्मे॥ कर्म्मकृतःसइवाचामयो
भुव॥ देवेभ्यःकर्म्मकृचास्त्वप्तसचामुवः॥४७॥ अववभृयनिचुम्पुण
॥निचेरुरसिनिचुम्पुणः॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्य
कृतमुरुराव्णोदेवरिषस्पाहि॥४८॥ पूर्णादर्विपरापतसुपूर्णापुनरापत॥

शिव·
॥१७॥

© Dharmartha Trust J&K. Digitized by eGangotri

व्रुस्नेवविक्क्रीणावहाऽइषमूर्ज्जꣳ शतक्क्रतो ॥ ४९ ॥ देहिमे ददामि ते निमे
धेहि नि ते दधे ॥ निहारञ्च हरासि मे निहारन्निहराणि ते स्वाहा ॥ ५० ॥ अक्क्र
न्नमीमदन्त ॥ अक्रुन्नमीमदन्त ह्यव प्रियाऽअधूषत ॥ अस्तोषत स्वभा
नवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ ५१ ॥ सुसन्दृशन्त्वा ॥
वयम्मघवन्वन्दिषीमहि ॥ प्र नूनम्पूर्णवन्धुरस्तुतो यासि वशाँ२ ॥ ऽअनु
योजान्विन्द्र ते हरी ॥ ५२ ॥ मनो न्वा ॥ मनो न्वाह्वामहे नाराशꣳसेन सो
मेन ॥ पितृणाञ्च मन्मभिः ॥ ५३ ॥ आ न ॥ ऽएतु मनः पुनः क्क्रत्वे दक्षाय जी

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ हि॰ ३
॥१८॥
18

वसे॥ ज्योक्चसूर्य्यन्दृशे॥५४॥ पुनर्न्नः॥ पितरोमनोदधातुदैव्योजनः॥ जीवं
व्रातꣳसचेमहि॥५५॥ वयꣳसोम॥ व्रतेतवमनस्तनूषुबिभ्रतः॥ प्रजा
वन्तःसचेमहि॥५६॥ एषते॥ रुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वा या।
सा॰ ८ हैषतेरुद्रभागऽआखुस्तेपशुः॥५७॥ अवरुद्रम्॥ दीमह्यवदेवन्त्र्यम्ब
कम्॥ यथानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यवसा शिव॰
ययात्॥५८॥ भेषजमसि॥ भेषजङ्गवेश्वायपुरुषायभेषजम्॥ ॥१८॥
सुखम्मेषायमेष्यै॥५९॥ त्र्यम्बकंयजामहे॥ सुगन्धिम्पुष्टिवर्द्ध

© Dharmartha Trust J&K. Digitized by eGangotri

नमः ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ त्र्यम्बकं य
जामहे सुगन्धिं पतिवेदनम् ॥ उर्वारुकमिव बन्धनादितो मुक्षीय
मामुतः ॥ ६० ॥ एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि ॥ अवततधन्वा
पिनाकावसः कृत्तिवासा अहिंसन्नः शिवोऽतीहि ॥ ६१ ॥ त्र्यायुषं ज
मदग्नेः ॥ कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषं तन्नो ऽअस्तु त्र्यायुषम् ॥
॥ ६२ ॥ शिवो नाम ॥ शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा
हिंसीः ॥ निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वाहायसुवीर्य्याय॥ १९॥ इतिवाजसनेयीसंहितायांचतुर्थोध्यायः॥ ४॥

एदमगन्मदेवयजनंपृथिव्यायत्रदेवासोअजुषन्तविश्वे॥ ऋ

३० क्सामाभ्यांसन्तरन्तोयजुर्भीरायस्पोषेणसमिषामदेम॥ इमाआ

पःशमुमेसन्तुदेवीरोषधेत्रायस्वस्वधितेमैनंहिंसीः॥ १॥ आपो

अस्मान्मातरःशुन्धयन्तुघृतेननोघृतप्वःपुनन्तु॥ विश्वंहिरिप्रम्प्र ॥१९॥

वहन्तिदेवीरुदिदाभ्यःशुचिरापूतएमि॥ दीक्षातपसोस्तनूरसिताम्त्वा

शिवांशग्मामपरिदधेभद्रंवर्णम्पुष्यन्॥ २॥ महीनांपयोसिवर्चो

© Dharmartha Trust J&K. Digitized by eGangotri

दाऽस्यसि वर्चो मे देहि ॥ वृत्रस्यासि कनीनकश्चक्षुर्दाऽअसि चक्षुर्मे देहि

॥३॥ चित्पतिर्मा ॥ पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुना

त्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्य ते पवित्रपते पवित्र

पूतस्य यत्कामः पुने तच्छकेयम् ॥४॥ आ वो देवास ईमहे वामं

प्रयत्यध्वरे ॥ आ वो देवासऽआशिषो यज्ञियासो हवामहे ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰हि॰ ई॰

॥२॥

20

स्तः॥ क्षात्॥ भ्याम्॥

स्वाहा यज्ञं म॥ म्मनसः स्वाहोरोरन्तरिक्षा त्स्वाहा द्यावापृथिवीभ्या ६ स्वा

हा वाता दारभे स्वाहा॥ ६॥ आकूत्यै प्रयुजे॥ ग्नये स्वाहा मेधायै मन

सेग्नये स्वाहा दीक्षायै तपसेग्नये स्वाहा सरस्वत्यै पूष्णे॥ ग्नये स्वा शिव

हा॥ आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउरोऽअन्त ॥२॥

रिक्ष॥ बृहस्पतये हविषा विधेम स्वाहा॥ ७॥ विश्वो देवस्य॥

© Dharmartha Trust J&K. Digitized by eGangotri

नेतुर्म्मर्त्तोब्रुरी तस्त कव्यम्॥ बिस्थ्वोरायऽइषुद्धा निद्धु म्मंत्र ब्रुर्गीनपु। कव्य

सिस्वाहा॥य॥कुकद्भामयाः शिस्ये॥ स्यस्वेवामार मितेमोपास्य सुतस्या

इचे॥ बतेशर्म्मासि शर्म्मे मेयछन मेस्तेऽअस्नुमामाहिंऽसीः॥ हा॥कगा

सि॥ नगौस्याङ्गिरस्यू र्लम्म्रदाऽऊर्ज्जम्मायि धेहि॥ सोमस्य नीविरसि वि

ष्णोशर्म्मासि शर्म्मयजेमानस्येन्द्रस्ययोनिरसि सुसस्याः कृषीस्क

धि॥ नछ्रूयस्वबनस्पतेऽऊर्द्धोमोपास्यऽइसऽआस्य सुतस्याहचे

© Dharmartha Trust J&K. Digitized by eGangotri

अहि ३

॥२१॥ सुमृडीकामभिष्टये

२।

ं॥१०॥ वृत्रतूर्णुना वृत्रतूर्णुनाग्निर्बृहस्पतिर्यज्ञो वनस्पतिर्देवी इन्द्रियः॥
देवीन्द्रियं मनामहे वर्चोधां यज्ञवाहसं सुतीर्था नोऽअसद्वशे
अदेवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः शिव
स्वाहा॥११॥ प्राणाः पीताः॥ नेव तनूयमापोऽस्माकम्मनुरुद्रैस्तु ॥२१॥
शिवाः॥ ताऽअस्माकमयुस्माऽअनमीवाऽअनागसः स्वदन्तु देवीम
मृताऽऋतावृधः॥१२॥ इयन्नो॥ यति या तं प्रामुञ्चामिनपूजामा॥

वैरः

© Dharmartha Trust J&K. Digitized by eGangotri

ऽहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्यासम्भव ॥१३॥ अग्ने त्व
मू॥ अग्ने त्व ऽसु जागृहि वय ऽसु मन्दिषीमहि। रक्षाणो ऽअप्रयुच्छ
न्प्रबुधे नः पुनस्कृधि॥१४॥ पुनर्म्मनः पुनरायुर्म्म ऽआगन्पुनः प्रा
णः पुनरात्मा म ऽआगन्पुनश्चक्षुः पुनः श्रोत्रम्म ऽआगन्॥ वैश्वा
नरो ऽअदब्धस्तनूपा ऽअग्निर्न्नः पातु दुरितादवद्यात्॥१५॥ त्वमग्ने
व्रतपा ऽअसि देव ऽआ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥ रास्वेयत्सो

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ टि॰ हु॰

॥२२॥

२२

मा भूयो भरद्देवो नः सविता वसोर्दाता वस्वदात्॥१६॥ एषा ते शुक्र

वै॰ तनूरेतद्वर्चस्तया सम्भव भ्राजं गच्छ॥ जूरसि धृता मनसा जुष्टा वि

ष्णवे॥१७॥ तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वा

भि॰ ८ हा॥ शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि॥१८॥ चिदसि॥ शिव॰

मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः ॥२२॥ भा॰ सा॰ ८

शीर्ष्णी॥ सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषा

© Dharmartha Trust J&K. Digitized by eGangotri

स्पानु इ द्धेहिइ नाम्नाऽ

द्वेनस्पासिन्द्रायाद्धेहाय ॥१९॥ अनुत्वा ॥ मा ना मेन्नता मनुपि तानु

न्द्याःऽ भ्रा तासग र्भ्योनुसखा सयूथ्यः ॥ सा देवि देव मछेहीन्द्राय सोम ॑रुद्र म्रा

स्त्वा वर्त्तयतु स्वस्ति सोम सखा पुन रेहि ॥ ५ ॥ वस्व्यसि ॥ वस्व्यादैस्येति स्व्यासिःऽ

सिःऽ रस्यादित्यासि रुद्रासि चन्द्रासि ॥ बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो व

सुभिराचके ॥२१॥ अदित्यास्त्वा ॥ मूर्द्धन्नाजिघर्मि देवयजने पृथिव्या

इडायास्पदमसि घृतवत्स्वाहा ॥ अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे × सेम्मर्हे

स्वाऽ धुः ते पश

© Dharmartha Trust J&K. Digitized by eGangotri

माबयऽन्नायस्पोषेणबियोष्मानो ताराय ॥२२॥ समक्रुध्या रुद्धाधिया
सनृह्हिणायारुचहृसा ॥ मामऽआयुःप्रमोषीर्म्मोऽअहं तववीरं बिदेयत
वेदेविसद्दृशि ॥२३॥ एषते गायत्रोभागःऽइति मेसोमायब्रूता देषतेत्रै
ष्टुभोभागःऽइति मेसोमायब्रूतादेषतेजागतोभागःऽइति मेसोमायब्रू
ताच्छन्दोनामा नाॅ साम्राज्यङ्गच्छेति मेसोमायब्रूतादास्माकोऽसि
शुक्रस्तेग्रह्यो बिचितस्त्वा बिचिन्वन्तु ॥२५॥ अभित्यम्म ॥ अभिक

© Dharmartha Trust J&K. Digitized by eGangotri

त्यन्देवꣳसवितारम्मोण्योः कविक्रतुमर्च्चामिसत्यसवꣳरत्नधामभि मू।
प्रियम्मतिङ्कविम्॥ऊर्द्ध्वायस्यामतिर्ब्भाऽअदिद्युतत्सवीमनिहिरण्य नि।
पाणिरमिमीतसुक्रतुः कृपास्वः॥प्रजाब्भ्यस्त्वाप्रजास्त्वानु
प्राणन्तुप्रजास्त्वमनुप्राणिहि॥२५॥शुक्रन्त्वा॥शुक्रेणक्रीणा
मिचन्द्रञ्चन्द्रेणामृतममृतेन॥सग्मेतेगोरस्मेतेचन्द्राणितपस ली।
स्तनूरसिप्रजापतेर्व्वर्णः परमेणपशुनाक्रीयसेसहस्रपोषम्पु

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ हि॰ ३
२४॥
25

पियम्॥२१॥ मित्रो नः॥ मित्रो न एहि सुमित्रधः इन्द्रस्योरुमाविश दक्षि
णमुशन्नुशन्तं स्योनः स्योनम्॥ स्वान भ्राजाङ्घारे बम्भारे हस्त सुह
स्त कृशानवेते वः सोमक्रयणास्तान् रक्षध्वं मा वो दभन्॥२३॥ परि मा॥ शिवः
ग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज॥ उदायुषा स्वायुषोदस्थाममृ ॥२२॥
ताँ२ऽअनु॥२४॥ प्रति पन्थाम्॥ प्रति पन्थामपद्महि स्वस्तिगा
मनेहसम्॥ येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु॥२५॥ आदि

© Dharmartha Trust J&K. Digitized by eGangotri

गसि।ऽ

स्वक॥ अदित्यास्त्वग्नस्यादित्यै सदऽआसीद॥ अस्तभ्नाद्द्यां वृषभोऽ
सम्रा।ऽ अन्तरिक्षममिमीत वरिमाणम्पृथिव्याः॥ आसीदद्विश्वा भुवनानि स
ड्वि। म्राड्विश्वेत्तानि वरुणस्य व्रतानि॥ ३०॥ वनेषु वि॥ वनेषु व्यन्तरिक्षन्त
न। तान वाजमर्वत्सु पयऽ उस्रियासु। हृत्सु क्रतुं वरुणो विक्ष्वग्निन्दिवि म्रा
सूर्यमदधात्सोममद्रौ॥ ३१॥ सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकम्॥ द्राऽ
यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता॥ ३२॥ उस्रावेतन्धू

से।

© Dharmartha Trust J&K. Digitized by eGangotri

सहि॰ ३॰

॥२५॥

25

र्षद्धोतुर्ज्येष्ठो मनुष्युऽग्रवीरहणो ब्रह्मा चारिनो॥स्वस्तियजमानस्यगृ

हान्नोऽध्वनम॥३३॥मनुद्दोमे॥सिप्रथ्यवस्त्वभुवस्पतेविश्वान्यभिधामा ता।

नि॥मात्वापरिपरिणौविदन्मात्वापरिपन्थिनोविदन्मात्वावृकाऽघा

परापतन्ध्ययवोविरन्॥श्येनोभूत्वायजमानस्यगृहान्गाध्वतन्नौसंस्कृतम्॥३४॥ शिव ॥२५॥

नमोमित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतंसपर्यत॥दूरेदृशेदेव

जातायकेतवेदिवस्पुत्रायसूर्यायशंसत॥३५॥वरुणस्योत्तम्भनम॥

© Dharmartha Trust J&K. Digitized by eGangotri

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्य
सि वरुणस्य ऽऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥३६॥ या ते
धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं ॥ गयस्फान
ः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥३७॥ इति वाजसनेयी सं
हितायां चतुर्थोऽध्यायः ॥४॥ अग्नेस्तनूः ॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य
तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते

© Dharmartha Trust J&K. Digitized by eGangotri

विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥ अग्नेर्जनित्रम॥ अग्नेर्जनि
त्वा॥ त्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवाऽअसि॥ गायत्रेण त्वा छन्दसा
मि॥ मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि॥२॥
सौ॥ भवतन्नः॥ समनसौ सचेतसावरेपसौ॥ मा यज्ञꣳ हिꣳसिष्टम्मा यज्ञप
तिं जातवेदसौ शिवौ भवतमद्य नः॥३॥ अग्नावग्निः॥ अग्नावग्निश्च
रति प्रविष्टऽऋषीणाम्पुत्रोऽअभिशस्तिपावा॥ स नः स्योनः सुयजा

© Dharmartha Trust J&K. Digitized by eGangotri

यजे इडे देवेभ्यो हव्यंऽसदमप्रेसुषुस्वाहा ॥४॥ आपतये त्वा ॥ परिपतये
गृह्णामि तनूनप्त्रे शाक्कराय शक्कनऽओजिष्ठाय ॥ अनाधृष्टमस्यना
धृष्यन्देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमञ्ज
सा सत्यमुपगेषं स्विते मा धाः ॥५॥ अग्ने व्रतपाः ॥ त्वे व्रतपा
स्त्वे व्रतपा या तव तनूरियं सा मयि यो मम तनूरेषा सा त्वयि ॥ सह
नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥६॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ हि॰ ३

॥२६॥

तामूा३

ऽ॒ऽस्मू॒र॑ऽस्मुष्टा॥ देवस॒सो॒मा॒प्या॑य॒ता॒मि॒न्द्रा॒ये॒क॒ध॒न॒वि॒दे॒॥ आ॒तु॒भ्य॒मि॒न्द्रः॒ प्या

तामूा३ य॒ता॒मा॒त्व॒मि॒न्द्रा॒य॒ प्या॒य॒स्व॥ आ॒प्या॒य॒या॒स्मा॒न्त्स॒खी॒न्त्स॒न्या॒मे॒ध॒या॒स्व॒स्ति

ते॒दे॒व॒सो॒म॒सु॒त्या॒म॒शी॒य॥ ए॒ष्टा॒रा॒य॒: प्रे॒ष॒भ॒गा॒य॒ऽऋ॒तं॒ऋ॒त॒वा॒दि॒भ्यो॒न॒ शो॰ः

मो॒द्या॒वा॒पृ॒थि॒वी॒भ्यां॒मा॥७॥ या॒ते॑ऽअ॒ग्ने॒यः॒ श॒या॒त॒नू॒र्व॒र्षि॒ष्ठा॒ग॒ह्व॒रे॒ शि॒व॰

॥२७॥ ष्ठा॥ उ॒ग्रं॒व॒चो॒ऽअ॒पा॒व॒धी॒त्त्वे॒षं॒व॒चो॒ऽअ॒पा॒व॒धी॒त्स्वा॒हा॥ या॒ते॒ऽअ॒ग्ने॒र

ज॒: श॒या॒त॒नू॒र्व॒र्षि॒ष्ठा॒ग॒ह्व॒रे॒ष्ठा॥ उ॒ग्रं॒व॒चो॒ऽअ॒पा॒व॒धी॒त्त्वे॒षं॒व॒चो॒ऽअ॒पा

© Dharmartha Trust J&K. Digitized by eGangotri

धीता

वधीत्स्वाहा ॥ मा तेऽअग्नेऽइरिशाया तनूं वर्षिष्ठा गह्वरेष्ठा ॥ उग्रं वचोऽअपाव

ना धीता मसिाऽ

धीत्त्वेषं वचोऽअपावधीत्स्वाहा ॥ ८ ॥ नमाय नीमा ॥ सिविनाय नीमस्य

त्वाऽ माऽ

वतान्नाना थि नादर्वतान्नाद्या थि नानु ॥ विदेदग्निर्नभो नामाग्नेऽअ

हियो सि यम्

ङ्गिरऽआयुना नाम्नेहि योऽस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन

माऽ हि

न त्वादधे विदेदग्निर्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि यो द्वि

तीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वादधे विदेदग्नि

सि यम्

© Dharmartha Trust J&K. Digitized by eGangotri

ग्निर्न्नो नामाँग्नेऽङ्गिरऽआयुना नाम्नेहि यस्तु तो यस्यां पृथिव्यामसि
यत्तेनाधृष्टन्नाम यज्ञियन्तेन त्वादधे॥ अग्ने त्वा देववीतये॥ ९॥ सि ॐ त्वाऽ
सि॥ सपत्नक्षाहा देवेभ्यः कल्पस्वासि ॐ त्वाऽसि सपत्नक्षाहा देवे
भ्यः शुंधस्वासि ॐ त्वाऽसि सपत्नक्षाहा देवेभ्यः शुम्भस्व॥ १०॥ इन्द्र
घोषस्त्वा॥ वसुभिः पुरस्त्वात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोज
वास्त्वा पितृभिर्द्दक्षिणतः पातु विश्वकर्म्मा त्वादित्यैरुत्तरतः पाति

© Dharmartha Trust J&K. Digitized by eGangotri

रस्महन्नस्मे वार्बहिर्द्धा यज्ञान्निःसृजामि॥११॥ सिꣳह्यसि सपत्नसाही स्वाहा सिꣳह्यस
स्यादित्यवनिः स्वाहा सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सि
ꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा सिꣳह्यस्यावहदे
वान्यजमानाय स्वाहा भूतेभ्यस्त्वा॥१२॥ ध्रुवोऽसि पृथिवीं दृꣳह ध्रुव
क्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेः पुरीषमसि॥१३॥ दिर
युञ्जते मनः॥ऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰ विवाह
॥२९॥
२९

विड्डाडाद्वेषयुना विदेकऽइन्नाह्यौहवस्य सवितुः परिष्टुतिः स्वाहा ॥१४॥
इदं विष्णुः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा
ᳪं सुरे स्वाहा ॥१५॥ इरावती धेनुमती ॥ हिभूतᳪं सूयवसिनी मनवे
दशस्या ॥ व्यस्कभ्नारोदसी विष्णुवेते दाधर्थ पृथिवीमभितो मयू
खैः स्वाहा ॥१६॥ देवश्रुतौ ॥ देवेषु ॥ देवश्रुतौ देवेष्वाघोषतं प्राची
प्रेतमध्वरं कल्पयन्ती ऽऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ॥ स्वड्डाष्ठ
शिव
॥२९॥

© Dharmartha Trust J&K. Digitized by eGangotri

मावदतन्देवीदुर्य्येऽआयुर्म्मानिर्वादिष्टम्प्रजाम्मानिर्वादिष्टमत्ररमेथां
वर्ष्मन्पृथिव्याः॥१७॥ विष्णोर्नु॥ कंवीर्य्याणिप्रवोचंयःपार्थिवानिवि
ममेरजांसि॥ योऽअस्कभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगा
यो विष्णवेत्वा॥१८॥ दिवोवा॥ विष्णऽउतवापृथिव्यामहोवाविष्णऽ
उरोरन्तरिक्षात्॥ उभा॥ हिहस्तावसुनापृणस्वाप्रयच्छदक्षिणादोतस
व्याद्विष्णवेत्वा॥१९॥ प्रतत्॥ प्रतद्विष्णुस्तवतेवीर्य्येणमृगोनभीमः

© Dharmartha Trust J&K. Digitized by eGangotri

संहिता ह
॥३०॥

30 कुचरोगिरिष्ठाः॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा
॥२०॥ विष्णोरराटम॥ विष्णोरराट्यमसि॥ विष्णोःश्नप्त्रेस्थो विष्णोःस्यूरसि
विष्णोर्ध्रुवोऽसि॥ वैष्णवमसि विष्णवेत्वा॥२१॥ देवस्यत्वा॥ सवितुः
प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥ आददेनार्यसीदमहꣳरक्षसां ॥३०॥
ग्रीवाऽअपिकृन्तामि॥ बृहन्नसिबृहद्रवाबृहतीमिन्द्रायवाचंवद॥२२॥ र
क्षोहणंवलगहनं॥ वैष्णवीमिदमहन्तंवलगमुत्किरामियम्मेनिष्ट्यो

© Dharmartha Trust J&K. Digitized by eGangotri

यममात्यो निचखानेद महन्तं बलगमुत्किरामि यम्मे समानो यमसमा
नो निचखानेदमहन्तं बलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्नि
नो ३ चखानेदमहन्तं बलगमुत्किरामि यम्मे सजातो यमसजातो निचखा
नोत्कृत्याङ्किरामि ॥ २३ ॥ स्वराडसि ॥ सपत्नहा सत्रराडस्यभिमाति
हा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥ २४ ॥ रक्षोहणो वः ॥ रक्षो
हणो वो बलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो बलगहनो वनया ॥

© Dharmartha Trust J&K. Digitized by eGangotri

संहि ह

॥३१॥

31

यामि वैष्णवान्रक्षोहणौ वो वलगहनो वस्तृणामि वैष्णवान्रक्षोहणौ वां व

लगहना ऽ उपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णु वी वैष्णु

वमसि वैष्णवास्थ ॥२५॥ देवस्य त्वा ॥ सवितुः प्रसवेश्विनोर्बाहुभ्यांपू वा ऽ

ष्णोहस्ताभ्याम् ॥ आददे नार्यसीदमहꣳ रक्षसां ग्रीवा ऽ अपिकृन्तामि ॥ शिवः

यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा त्वा ॥३१॥

शुन्धन्ताल्लोकाः पितृषदनाः पितृषदनमसि ॥२६॥ उद्दिवꣳ ॥ उद्दिवꣳ

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रनाभान्तरिक्षम्पृणाऽदृंहस्व पृथिव्यान्दृंहस्व द्युतानस्त्वा मारुतो मिनोतु मित्रा
वरुणौ ध्रुवेण धर्म्मणा॥ ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि॥
ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह॥२७॥ ध्रुवासि॥ ध्रुवोयं यजमा
नोस्मिन्नायतने प्रजया पशुभिर्भूयात्॥ घृतेन द्यावापृथिवी पूर्व्ये
थामिन्द्रस्य छदिरसि विश्वजनस्य छाया॥२८॥ परि त्वा गिर्वणो गिर इ
मा भवन्तु विश्वतः॥ वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः॥२९॥ इन्द्रस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सा हि

॥३२॥

32

स्यूः॥ ३॥ इंस्य स्यूरसीं हूस्य क्रवो ऽसि॥ ऐ३ मसि वैश्वदेवमसि॥ ३४॥ विभूरसि॥
प्रवाहणो वह्निरसि हव्यवाहनः॥ श्वात्रोऽसि प्रचेता स्तुथोऽसि विश्ववेदाः
उशिगसि॥ ३५॥ उशिगसि कविरङ्घारिरसि बम्भारिरवस्यूरसि दुवस्वा
ञ्छुन्ध्यूरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभो

॥३२॥

ऽसि प्रतक्वा मृष्टोऽसि हव्यसूदन ऋतधामासि स्वर्ज्योतिः समुद्रोऽसि॥ ३६॥
समुद्रोऽसि विश्वव्यचा अजोऽस्येकपादहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य

© Dharmartha Trust J&K. Digitized by eGangotri

ह्वारौ मा मा सन्ताप्समध्वनामध्वपते प्रमातिरस्वस्तिमेस्मिन्पथिदेवयानेभू
भू। यात्मित्रस्यमा॥३३॥ मित्रस्यमाचक्षुषेक्षध्वमग्नयःसगराःसगरास्थसगा स्थ।
रेणनाम्नारौद्रेणानीकेनपातमाग्नयःपिपृतमाग्नयोगोपायतमान
मोवोस्तुमामाहिंसिष्ट॥३४॥ ज्योतिरसि॥ विश्वरूपंविश्वेषान्देवा
द्वेः नां॥ समित्॥ त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यउरुयन्तासिवरूथ घ
ᳫं स्वाहाजुषाणोऽअप्तुराज्यस्यवेतुस्वाहा॥३५॥ अग्नेनय॥ सुपथारा

© Dharmartha Trust J&K. Digitized by eGangotri

हि॰ ३॰
॥३३॥
33

यऽस्मस्मान्विश्वानि देववयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयि
ष्ठान्ते नमऽउक्तिं विधेम॥३६॥ अयन्नः॥ अयन्नोऽअग्निर्वरिवस्कृणोत्वय
म्मृधः पुरऽएतु प्रभिन्दन्॥ अयं वाजाञ्जयतु वाजसातावयः शत्रूञ्जयतु
जर्हृषाणः स्वाहा॥३७॥ उरु विष्णो॥ विक्रमस्वोरु क्षयाय नस्कृधि॥ घृत
घृतयोने पिब प्रप्र यज्ञपतिन्तिर स्वाहा॥३८॥ देव सवितः॥ देव सवितरेष
ते सोमस्तं रक्षस्व मा त्वा दभन्॥ एतत्त्वं देव सोम देवो देवाँ॥ऽउपागाऽइ

शिव
॥३३॥

© Dharmartha Trust J&K. Digitized by eGangotri

दमहम्ममुष्ष्यांस्माहम्रायस्पोषेणस्वाहा॥ निर्ब्बरुणस्यपाशान्मुच्ये॥ द्वर्या॥ अ
ग्नेव्रतपाः॥ अग्नेव्रतपास्त्वेव्रतपायानवतनूर्म्मय्यभूदेषासात्वयियो यि।
ममतनूस्त्वय्यभूदियंसामयि॥ यथायथन्नौव्रतपतेव्रतान्यनुमेदीक्षा
दीक्षापतिरमं०७स्तानुतपस्तपस्पतिः॥४०॥ उरुहविष्णोविक्रमस्वोरुक्ष स्वाउ
यायनस्कृधि॥ घृतंघृतयोनेपिबप्रप्रयज्ञपतिन्तिरस्वाहा॥४१॥ अत्या
न्यागां॥ अत्यन्न्यागांनान्न्यान्नुपागामर्व्वाक्त्वापरेभ्योविदम्परोवे

रेभ्यः।ऽ

© Dharmartha Trust J&K. Digitized by eGangotri

सहि॰ ६
॥३५॥

रभ्य॥॥ तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै
त्वाम्॥ जुषन्तां विष्णवे त्वा॥ ओषधे त्रायस्व स्वधिते मैनं हिंसीः॥ द्यां मा॥ लेखी ॥४२॥
रन्तरिक्षं मा हिंसीः पृथिव्या सम्भव॥ अयं हि त्वा स्वधितिस्तेतिजा
नः प्रणिनाय महते सौभगाय॥ अतस्त्वं देव वनस्पते शतवल्शो वि शिवन ॥४३॥
रोह सहस्रवल्शा वि वयं रुहेम॥ इति वाजसनेयीसंहितायां पञ्चमोध्या
यः॥ श्री॥॥ ६॥ देवस्य त्वा॥ सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा॥

© Dharmartha Trust J&K. Digitized by eGangotri

आददे नार्यसीदमहꣳ रक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोऽसि यवयास्मद्द्वेषो
यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः
पितृषदनमसि ॥ १ ॥ अग्रेणीरसि स्वावेशऽउन्नेतॄणामेतस्य वित्ता
दधि त्वा स्थास्यति देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधी
भ्यः ॥ द्यामग्रेणास्पृक्षऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः
॥ २ ॥ या ते ॥ या ते धामा[illegible]न्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा

© Dharmartha Trust J&K. Digitized by eGangotri

ञाऽश्ममयासः॥ ७॥ अत्राह तदुरुगायस्य विष्णोः परममपदमवभाति भूरि॥ व१
ब्रह्मवनि त्वा क्षत्त्रवनि रायस्पोषवनि पर्य्यूहामि॥ ब्रह्म दृंऽह क्षत्त्रं दृं
ऽहायुर्दृंऽह प्रजां दृंऽहा॥ २॥ विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्प
शे॥ इन्द्रस्य युज्युः सखा॥ ४॥ तद्विष्णोः॥ परमम्पदंऽसदा पश्यन्ति सूरयः शिव॰
॥ दिवीऽव चक्षुराततम्॥ ५॥ परिवीरसि॥ परि त्वा देवीर्विशो व्ययन्ता ॥३५॥ तामु
म्परीमं यजमानंऽरायो मनुष्याणाम्॥ दिवः सूनुरस्येष ते पृथिव्यां

हा७ ना नमा शिए

© Dharmartha Trust J&K. Digitized by eGangotri

द्यो कऽ यौरस्यस्त्वेपशुः।।८।।उपावीरसि।।उपावीरस्युपदेवान्दैवीर्विशः
प्रागुरुशिजो वह्नितमान्।। देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम्।।७।। रे
वतीरमध्वम्।। रेवतीरमध्वम् [illegible] बृहस्पते धारयाव
सूनि।। ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः।।८।।
देवस्य त्वा।। सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्।। अ
ग्नीषोमाभ्याञ्जुष्टन्नियुनज्मि।। अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मं

३९

© Dharmartha Trust J&K. Digitized by eGangotri

संहिता

।।२६।।

36

न्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः ।। अग्नीषोमाभ्यां त्वा जु

ष्टं प्रोक्षामि ।। ९ ।। अपां पेरुः ।। अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित्स रसि।ऽ

द्देवहविः ।। सं ते प्राणो वातेन गच्छतां समङ्गानि यजत्रैः सं यज्ञपति त्रैः

राशिषा ।। १० ।। घृतेनाक्तौ ।। पशूँस्त्रायेथां रेवति यजमाने प्रियं धा ऽ शिषः

आविश ।। उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज सम ।।२६।।

स्य तन्वा भव ।। वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः स्वाहा देवेभ्यो देवेभ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

स्वाहा ॥११॥ माहिः ॥ माहिर्भूर्म्मापृदाकुर्न्नमस्तऽआतानानर्वाप्रेहि ।
घृतस्यकुल्याऽउपऽऋतस्यपथ्याऽअनु ॥१२॥ देवीरापः ॥ शुद्धावो
ढुमा। ढ्वꣳसुपरिविष्टादेवेषुसुपरिविष्टावयम्परिवेष्टारोभूयास्म ॥१३॥ वा
चन्ते ॥ शुन्धामिप्राणन्तेशुन्धामिचक्षुस्तेशुन्धामिश्रोत्रन्तेशुन्धामि मि।
[illegible]नाभिन्तेशुन्धामिमेढ्रन्तेशुन्धामिपायुन्तेशुन्धामिचरित्रांस्ते
शुन्धामि ॥१४॥ मनस्तऽआप्यायतांवाक्तऽआप्यायता मू।
नामू।

© Dharmartha Trust J&K. Digitized by eGangotri

सहि.इ.

॥३७॥

37

४ा रक्षोमितिनिष्टामीदमहं ॥४

म्माण एवन्नऽआप्यायतान्स्वदस्तु एन्नऽआप्यायतां स्माद्न्नऽआप्यायताम्॥

यत्ते क्रूरं यदास्थितं तत्तऽआप्यायतां निष्ट्यायतां तत्ते शुध्यतु शमहो

भ्यः॥ ओषधे त्रायस्व स्वधिते मैनं हिंसीः॥१९॥ रक्षसां भागोऽसि

रक्षसां भागोऽसि निरस्तं रक्षऽइदमहं रक्षोऽवबाधऽइदमहं रक्षो ॥३७॥

धमन्तमोनयामि॥ घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोका

नामग्निराज्यस्य वेतु स्वाहा स्वाहाकृते ऽऊर्ध्वनभसं मारुतं गच्छ

शिव.

© Dharmartha Trust J&K. Digitized by eGangotri

त्न्मा॥१६॥इदमापः॥प्रवहतावद्यञ्चमलञ्चयत्॥यच्चाभिदुद्रोहा
नृतंयच्चशेपेऽभीरुणम्॥आपोमातस्मादेनसः॥पवमानश्चमुञ्च
त्वतु॥१७॥सन्ते॥सन्तेमनोमनसासम्प्राणःप्राणेनगच्छताम्॥रे
ऽस्यग्निष्ट्वाश्रीणात्वापस्त्वासमरिणन्वातस्यत्वाध्राज्यैपूष्णोरंह्यं
याऽऊष्मणोव्यथिषत्प्रयुतन्द्वेषः॥१८॥घृतङ्घृतपावानः॥पिब
तवसांवसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा॥दिशःप्र

© Dharmartha Trust J&K. Digitized by eGangotri

संहि० हे
॥३८॥
38

दिशोऽन्त्रादिशोविदिशोऽनुदिशोदिग्भ्यःस्वाहा॥१९॥ऐन्द्रःप्राणः॥ऐन्द्रः
प्राणोऽअङ्गेऽअङ्गेनिधीदीध्यदैन्द्रउदानोऽअङ्गेऽअङ्गेनिधीतः॥दे
वत्वष्टर्भूरितेसंसमेतुसलक्ष्मायद्विषुरूपम्भवाति॥देवत्रायन्त
स्वायः मवसेसखायोऽनुत्वामातापितरोमदन्तु॥२०॥समुद्रङ्गच्छस्वाहा शिवः
न्तरिक्षङ्गच्छस्वाहादेवंसवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वा ॥३८॥
हाहोरात्रेगच्छस्वाहाछन्दांसिगच्छस्वाहाद्यावापृथिवीगच्छस्वा

© Dharmartha Trust J&K. Digitized by eGangotri

हायज्ञꣳस्वाहासोमꣳस्वाहादिव्यान्नभोगच्छस्वाहाग्निंवैश्वान
रꣳस्वाहामनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिःपृथिवी
म्भस्मनापृणस्वाहा॥२१॥मापः॥मापोमौषधीर्हिꣳसीर्द्धाम्नोधाम्नो
राजंस्ततोवरुणनोमुञ्च॥यदाहुरघ्न्याऽइतिवरुणेतिशपामहेत
तोवरुणनोमुञ्च॥सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रिया
स्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः॥२२॥हविष्मतीरिमाः॥ऽआ

© Dharmartha Trust J&K. Digitized by eGangotri

महि ३

॥३९॥

39

यः।

पोहविष्णोरराँऽस्त्र्या विवासति॥ हविष्मान्देवोऽध्वरोहविष्माँयाँऽस्त्र

स्तुसूर्यः॥२३॥ अग्निर्देवः॥ असमेवोपन्नगृहस्यसदसिसारयामीन्द्रा(मि। ८

ग्न्योर्भागधेयीस्थमित्रावरुणयोर्भागधेयीस्थविश्वेषान्देवानां

भागधेयीस्थ॥ अमूर्याऽउपसूर्येयाभिर्वासूर्यःसह॥ तानोहिन्व शिवः ॥३९॥

न्त्वध्वरम्॥२४॥ हृदेत्वा॥ हृदेत्वामनसेत्वादिवेत्वासूर्यायत्वा॥ ऊर्ध्वमि

ममध्वरन्दिविदेवेषुहोत्रायच्छ॥२५॥ सोमराजन्॥ सोमराजन्विश्वा

© Dharmartha Trust J&K. Digitized by eGangotri

स्वस्रा जाऽनुपावेरो हविष्या स्वस्रा जाऽनुपावेरोहन्नु॥ शृणोत्वग्निः समि
धा हवम्मे शृण्वन्त्वापो धिषणाश्च देवीः॥ श्रोता ग्रावाणो विदुषो न यज्ञं
शृणोतु देवः सविता हवम्मे स्वाहा॥२६॥ देवीरापः॥ देवीरापोऽपान्नपा
द्यो वऽऊर्म्मिर्हविष्य इन्द्रियावान्मदिन्तमः॥ तन्देवेभ्यो देवत्रा दत्त शुक्र
पेभ्यो येषां भाग स्थ स्वाहा॥२७॥ कार्षिरसि॥ कार्षिरसि समुद्रस्य त्वाक्षित्या
ऽउन्नयामि॥ समापोऽअद्भिरग्मत समोषधीभिरोषधीः॥२८॥ यमग्ने॥

© Dharmartha Trust J&K. Digitized by eGangotri

सा०
॥४-॥
५०

इन्दुमन्तोमवावाजेषुयज्ञुनाः॥सप्तत्राशाश्वतीरिषःस्वाहा॥२२॥देवस्य
त्वा॥सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम॥आददेनारिवामसि २।२
गंभीरमिममध्वरंकृधीन्द्रायसुषूतमम॥उत्तमेनपविनोर्जस्वन्तम्म
धुमन्तम्पायस्वन्तंनिग्राभ्यास्थदेवश्रुतस्तर्पयतमाम॥मनोमे॥३मामनोमे॥ शिव
तर्पयतवाचम्मेतर्पयतप्राणम्मेतर्पयतचक्षुर्मेतर्पयतश्रोत्रम्मे ॥४०॥
तर्पयतात्मानम्मेतर्पयतप्रजाम्मेतर्पयतपशून्मेतर्पयतगणान्मे

© Dharmartha Trust J&K. Digitized by eGangotri

२ ग्रहे

नर्य यन्तं गणो मे मा वितृषन्॥३१॥ इन्द्राय त्वा॥ इन्द्राय त्वा वसुमते रुद्र
वतऽइन्द्राय त्वादित्यवतऽइन्द्राय त्वाभिमातिघ्ने॥ श्येनाय त्वा सो
मभृते [illegible] त्वा रायस्पोषदे॥३२॥ यत्ते॥ सोम दिवि ज्योतिर्यत्पृथि
व्यां यदुरावन्तरिक्षे॥ तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वो
चः॥३३॥ श्वात्रा स्थ॥ वृत्रतुरो राधोगूर्त्ताऽअमृतस्य पत्नीः॥ ता दे
वीर्देवत्रेमं यज्ञं नयतोपहूताः॥ सोमस्य पिबत॥३४॥ मा भेः॥

© Dharmartha Trust J&K. Digitized by eGangotri

सहि

४१

मा भेर्म्मा संविंक्था ऊर्ज्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्ज्जं दधाथा
म्॥ पाप्मा हतो न सोमः॥३५॥ प्रागपाक्॥ प्रागपागुदगधराक्सर्व
तस्त्वा दिश ऽआधावन्तु॥ अम्ब निष्पर समरीर्विदाम्॥३६॥ त्वम
ङ्ग॥ प्रशं ऽसिषो देवः शविष्ठ मर्त्यम्॥ न त्वदन्यो मघवन्नस्ति म
र्डितेन्द्र ब्रवीमि ते वचः॥३७॥ इति वाजसनेयीसंहितायां षष्ठो
ध्यायः॥६॥ वाचस्पतये पवस्व वृष्णो ऽअंशुभ्यां गभस्तिपूतः॥

शिवजी ॥४१॥

© Dharmartha Trust J&K. Digitized by eGangotri

दृंवो देवेभ्यः पवस्व येषां भागोसि ॥ १ ॥ मधुमतीर्न्नः ॥ मधुमतीर्न्नऽइ
षस्कृधि यत्ते सोमादाभ्यन्नाम जागृवि तस्मै ते सोम सोमाय स्वाहा
स्वाहोर्वन्तरिक्षमन्वेमि स्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृतोसि विश्वेभ्यऽ
इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय
देवेभ्यस्त्वा मरीचिपेभ्यो देवांशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भ
ङ्गेन हतोसौ फट् प्राणाय त्वा व्यानाय त्वा ॥ ३ ॥ उपयामगृहीतोसि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰हि॰

८४२॥

उपयामगृहीतोस्यन्तर्यछमघवन्पाहिसोमम्॥उरुष्यरायऽएषोयज
स्व॥४॥अन्तस्ते॥अन्तस्तेद्यावापृथिवीदधाम्यन्तर्दधाम्युर्वन्तरिक्षम्॥
सजूर्देवेभिरवरैःपरैश्चान्तर्यामेमघवन्मादयस्व॥५॥स्वाङ्कृतोसि॥
स्वाङ्कृतोसिविश्वेभ्यऽइन्द्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमनस्त्वाष्टुस्वा शिव॰
हात्वासुभवसूर्यायदेवेभ्यस्त्वामरीचिपेभ्यऽउदानायत्वा॥६॥आवा ॥४२॥
वायो॥भूषशुचिपाऽउपनःसहस्रन्तेनियुतोविश्ववार॥उपोतेऽन्धो

© Dharmartha Trust J&K. Digitized by eGangotri

न्धोमद्यमयामियस्यदेवदधिषेपूर्वपेयंवायवेत्वा॥७॥इन्द्रवायूइमे
म॥सुताउपप्रयोभिरागतम्॥इन्दवोवामुशन्तिहि॥उपयाम
गृहीतो[illegible]सिवायवइन्द्रवायुभ्यांत्वैषतेयोनिःसजोषोभ्यांत्वा
॥८॥अयंवाम्॥अयंवांमित्रावरुणासुतःसोमऋतावृधा॥म
मेदिहश्रुतंहवम्॥उपयामगृहीतोसिमित्रावरुणाभ्यांत्वा
॥९॥रायावयम्॥रायावयंससवांसोमदेमहव्येनदेवाय

© Dharmartha Trust J&K. Digitized by eGangotri

संहि
४३॥

43

वसेनगावः॥ तान्धेनुम्मित्रावरुणायुवन्नोविश्वाहाधत्तमनपस्फुर मनीमा ८
न्तीमेषतेयोनिर्ऋतायुब्भ्यान्त्वा॥१०॥ यावाम्॥मा वाङ्कशामधुमत्याश्वि
नासूनृतावती॥ तयायज्ञम्मिमिक्षतम्॥ उपयामगृहीतोस्यश्विब्भ्या
वा ६ न्त्वैषतेयोनिर्म्माध्वीब्भ्यान्त्वा॥११॥ तम्प्रत्नथा॥ तम्प्रत्नथापूर्वथा शिव·
विश्वथेमथाज्येष्ठतातिम्बर्हिषदं स्वर्विदम्॥ प्रतीचीनंवृजनं ॥४३॥
न्दोहसेधुनिम्मा शुञ्जयन्तमनुयासुवर्द्धसे॥ उपयामगृहीतो

© Dharmartha Trust J&K. Digitized by eGangotri

सिशसद्दायज्ञेषतेयोनिर्वीरतोम्पात्स्यपमृष्टःशसेोरेवास्त्वाशुक्रपाः
अणीयन्त्वनोधृष्ट्वासि॥१२॥सुवीरोवीरान्प्रसुवीरोवीरान्प्रजन
यन्परीत्युमिरायस्पोषेणयजमानम्॥सञ्जग्मानोदिवापृथिव्या
शुक्रःशुक्रशोचिषानिरस्तःशण्डःशुक्रस्याधिष्ठानमसि॥१३॥
अच्छिन्नस्यातेदेवसोमसुवीर्यस्यरायस्पोषस्यददितारःस्याम॥साप्रथ
मासंस्कृतिर्विश्ववारासप्रथमोवरुणोमित्रोऽअग्निः॥१४॥

मुवीर्यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सौ०ह
॥१४॥

मप्रथमे॥ सप्रथमोऽहस्यतिष्ठिकिंचाँस्तस्मा ऽङ्गत्रीयमुतमाकु
होतस्वाहा॥ तृपन्नुराजामङ्घायाः खिष्टायाः सुष्टीनाः सुइनायत्स्वा
हायाऽग्नीना॥२५॥ अयंवेनः॥ अयवेनस्त्वोदयत्सृष्निगर्भाज्यो
तिर्जरयूरोरजसोविमाने॥ इममपा ऽऽ संगमे सूर्यस्यशिशुं
नविप्रामतिभीरिहन्ति॥ तपयामगृहीनामिमर्कोयत्ता॥२६॥
मनोना॥ मनोनयेषुहवनेषुतिग्मंविपः शच्यावनुथोद्रवन्ता॥

शिवः
॥४५॥

© Dharmartha Trust J&K. Digitized by eGangotri

आयः शर्धोमित्रस्त्रि विहल्लोऽस्मस्या अश्रीणीनादिशाङ्गः अस्त्रावे

षेतेसोनिः पृजाः पास्त्रे पसृष्ट्रामक्रौरि मास्त्रो मास्थिपाः प्राण

यस्त्वनो धृष्टासि ॥१९॥ सुष्ठुजाः प्रजाः । सुप्रजाः प्रजाः प्रजन

यन्नारीत्वभिरायस्पोषेणायजनमानमू ॥ सम्जगमानो दिवा पृथि

व्यामन्थीमस्थिशोचिषानिरस्त्रामक्रौमस्थिनो धृष्टानमसि ॥

२०॥ यदेवासः ॥ यदेवासो हृद्यकादशास्थस्थपृथिव्यामधेको

© Dharmartha Trust J&K. Digitized by eGangotri

सं हि
॥५४॥
45

दशास्थ॥ अप्सुक्षितोमहिनैकादशास्थतेदेवासोयज्ञमिमञ्जुषध्वम्॥१९॥
उपयामगृहीतोसि॥ उपयामगृहीतोस्याग्रयणोसिस्वाग्रय
णः॥ पाहियज्ञम्पाहियज्ञपतिंविष्णुस्त्वामिन्द्रियेणपातुविष्णुन्त्व
म्पाह्यभिसवनानिपाहि॥२०॥ सोमःपवते॥ सोमःपवतेस्मैब्र
ह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऊर्जेपव
तेद्भ्यऽओषधीभ्यःपवतेद्यावापृथिवीभ्याम्पवतेसुभूतायपव

शिव
॥५४॥

© Dharmartha Trust J&K. Digitized by eGangotri

तेविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥२१॥उप
यामगृहीतोसि॥उपयामगृहीतोसीन्द्रायत्वाबृहद्वतेवयस्वतऽ
उक्थाव्युंगृह्णामि॥यत्तऽइन्द्रबृहद्वयस्तस्मैत्वाविष्णवेत्वैषते
योनिरुक्थेभ्यस्त्वादेवेभ्यस्त्वादेवाव्यंयज्ञस्यायुषेगृह्णामिमि
त्रावरुणाभ्यान्त्वा॥२२॥मित्रावरुणाभ्यान्त्वादेवाव्यंयज्ञस्यायु
षेगृह्णामीन्द्रायत्वादेवाव्यंयज्ञस्यायुषेगृह्णामीन्द्राग्निभ्यान्त्वा

© Dharmartha Trust J&K. Digitized by eGangotri

सहि॰ ॥५६॥

ह्णामि। इं

देवाव्यं यज्ञस्यायुषेगृह्णामीन्द्रावरुणाभ्यान्त्वादेवाव्यं यज्ञस्यायुषेगृ

ह्णामि। इं

ह्णामीन्द्राबृहस्पतिभ्यान्त्वादेवाव्यं यज्ञस्यायुषेगृह्णामीन्द्राविष्णु

भ्यान्त्वादेवाव्यं यज्ञस्यायुषेगृह्णामि॥२३॥ मूर्द्धानन्दिवः॥ मूर्द्धानं

न्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कविꣳसम्

म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः॥२४॥ उपयाम

गृहीतोसिध्रुवोसिध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमोऽच्युतानामच्युत

नमः॥ऽ

शिव ॥५६॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्विन्नम ऽ एषते योनिर्वैश्वानरायत्वा॥ इन्द्रवन्तु वेणमनसावाचासो
ममवन्नयामि॥ अथान ऽ इन्द्र ऽ इहि हंसी सपत्नाः समनमस्करत॥ ५॥
यस्ते॥ इन्द्रप्रास्करंतियस्ते अ ८ मुण्याविश्वनाधिपत्ययोरुपस्थात्॥ अद्व
र्यावीपरिवायः पविज्ञानेजुहोमिमनसावषट्कृतं ७ स्वाहादेवाना
४ कृ २ मुक्ष[illegible]मणस्या॥ २६॥ प्राणायमे॥ वर्चोदावर्चसेपवस्वव्यानायमे
वर्चोदावर्चसेपवस्वोदानायमेवर्चोदावर्चसेपवस्ववाचेमेवर्चो
स्वा ३

© Dharmartha Trust J&K. Digitized by eGangotri

मं.री.
॥४७॥

दाववैसपवस्वुकृतूदक्षान्याम्यावर्ज्ञांदाववैसपवस्वश्नाज्ञोयमेववर्षो
दाववैसपवस्वचस्तुर्ज्ञांमेववर्चोदसोववैसपवथामास्कानेमे॥२०॥स्व
स्कानेमे।ववर्चोदाववर्चसपवस्वाजेसमेववर्चोदाववैसपवस्वायुषमेव
र्चोदाववर्चसपवस्वाविश्वान्यामेप्रजान्योववर्चोदसोववर्चसपवथामे॥ शिव ॥८॥
स्व।कोसि॥कतमोसिकस्यासिकोनामासि॥यस्यतेनामामन्महि
यन्त्वासोमेनातीतृपाम॥भूर्भुवःस्वः।सुप्रजाःप्रजाभिःस्यांसुवी हि

सौवीरः सुपोषः पोषैः ॥२९॥ उपयामगृहीतोसि ॥ उपयामगृहीतोसि मधा
वे त्वोपयामगृहीतोसि माधवाय त्वोपयामगृहीतोसि सुक्राय त्वोपया
मगृहीतोसि सुचये त्वोपयामगृहीतोसि नभसे त्वोपयामगृहीतोसि
नभस्याय त्वोपयामगृहीतोसीषे त्वोपयामगृहीतोस्यूर्जे त्वोपयाम
गृहीतोसि सहसे त्वोपयामगृहीतोसि सहस्याय त्वोपयामगृहीतो
सि तपसे त्वोपयामगृहीतोसि तपस्याय त्वोपयामगृहीतोस्यंहस

© Dharmartha Trust J&K. Digitized by eGangotri

सं० हि० ८

स्य तये स्वा॥३०॥ इन्द्राग्नी आगतम्॥ इन्द्राग्नी ऽआगतꣳसुतङ्गीर्भिर्न
भो वरेण्यम्॥ अस्य पातन्धियेषिता॥ उपयामगृहीतोसीन्द्राग्निभ्यां
त्वैष तेयोनिरिन्द्राग्निभ्यान्त्वा॥३१॥ आघा॥ आघायेऽअग्निमिन्धते
स्तृणन्ति बर्हिरानुषक्॥ येषामिन्द्रो युवा सखा॥ उपयामगृहीतोस्य
ग्नीन्द्राभ्यान्त्वैष ते योनिरग्नीन्द्राभ्यान्त्वा॥३२॥ ओमासश्चर्षणीधृतः
ओमासश्चर्षणीधृतो विश्वेदेवासऽआगत॥ दाश्वाꣳसो दाशुषꣳ

© Dharmartha Trust J&K. Digitized by eGangotri

